श्वसोऽन्यतरस्याम् ।" ४।२।१०५ । इति पक्षे त्युट्युलौ ।) ह्योभवम् । गतदिवसीयम् । इति शब्दमाला ॥ (यथा, महाभारते । ५ ।१८६।४ ।
"ह्यस्तनेन च कोपेन शक्तिं वै प्राहिणोन्मयि ॥")

ह्यस्त्यः त्रि, (ह्यो भव इति । ह्यस्+"ऐषमोह्यः-श्वसोऽन्यतरस्याम् ।" ४।२।१०५ । इति त्यप् ।) ह्यस्तनम् । इति शब्दमाला ॥

ह्रग, म ए संवरणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रेफमध्यः । म, ह्रगयति । ए, अह्रगीत् । इति दुर्गादासः ॥

ह्रणीया, स्त्री, (ह्रिणीया । पृषोदरादित्वात् साधुः ।) ह्रिणीया । इत्यमरटीकायां भरतः ॥

ह्रदः, पुं, (ह्रादते इति ह्राद अव्यक्तशब्दे+अच् । पृषोदरादित्वात् ह्रस्वः) अगाधजलाशयः । इत्यमरः । १ । १० । २५ ॥ तज्जलगुणाः । ह्रदवारि वह्निजननं मधुरं कफवातहारि पथ्यञ्च । इति राजनिर्घण्टः ॥ किरणः । इत्यमरटीकायां रामाश्रमः ॥

ह्रदग्रहः, पुं, (ह्रदस्य ग्रहः ।) कुम्भीरः ।। इति त्रिकाण्डशेषः ॥

ह्रदिनी, स्त्री, (ह्रदोऽस्यामस्तीति । इनि । ङीप् ।) नदी । इत्यमरः । १ । १० । २५ । (यथा, भागवते । २ । ७ । २८ ।
"तच्छुद्धयेति विषवीर्य्यविलोलजिह्व-
मुच्चाटयिष्यदुरगं विहरन् ह्रदिन्याम् ॥")

ह्रप, क भाषणे । (चुरा०-पर०-सक०-सेट् ।) रेफयुक्तादिरित्येके । क, ह्रापयति । भाषणं कथनम् । इति कविकल्पद्रुमटीकायां ह्लपधातुकथने दुर्गादासः ॥

ह्रस, रवे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) रेफयुक्तः । ह्रसति । इति दुर्गादासः ॥

ह्रसिमा, [न्] पुं, (ह्रस्वस्य भावः । "पृथ्वादिभ्य इमनिज् वा ।" ५ । १ । १२२ । इति इमनिज् । "स्थूलदूरयुवह्रस्वक्षिप्रेति ।" ६ । ४ । १५६ । इति ह्रसादेशः ।) ह्रस्वता । ह्रस्वशब्दात् इमन्प्रत्ययेन निष्पन्नः ॥

ह्रसिष्ठः, त्रि, (अतिशयेन ह्रस्वः । इष्ठन् । "स्थूलदूरयुवह्रस्वेति ।" ६ । ४ । १५६ । इति ह्रसादेशः ।) अतिशयह्रस्वः । इत्यमरः । ३ । १ । ११२ ॥ ह्रस्वशब्दात् इष्ठप्रत्ययेन निष्पन्नः ॥

ह्रसीयान्, [म्] त्रि, (ह्रस्व+ईयसुन् । ह्रसादेशश्च ।) अतिशयह्रस्वः ॥

ह्रस्वं, क्ली, ("सर्व्वनिघृष्वरिष्वेति ।" उणा० १।१५३ इत्यत्र "ह्रसगन्धे बाहुलकात् ततोऽपि वन् ।" इत्युज्ज्वलदत्तोक्तेर्वन् ।) परिमाणविशेषः । यथा,
"अत्र दीर्घं महद्ध्रस्वमिति तद्भेद ईरतिः ।"
इति भाषापरिच्छेदः ॥
गौरसुवर्णशाकम् । पुष्पकासीसम् इति राजनिर्घण्टः ॥

ह्रस्वः, पुं, स्त्री, (ह्रस+वन् ।) प्रकृतपुरुषप्रमाणात् न्यूनमनुष्यः । बाउने इति भाषा । तत्पर्य्यायः । खर्व्वः २ वामनः ३ वामनी ४ । इत्यमरभरतौ । २ । ६ । ४६ ॥ नीचकः ५ नीचः ६ । इति शब्दरत्नावली ॥ अकर्त्तनः ७ । इति जटाधरः ॥ एकमात्रवर्णः, पुं । यथा,—
"एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम् ॥"
इति मुग्धबोधटीकायां दुर्गादासः ॥
मुग्धबोधमते अस्य स्व-संज्ञा । यथा । आवत्स्वघंप्लु । अ-आ-अ इति वर्णत्रयं क्रमेण स्व-घं-प्लु-संज्ञं स्यात् । वस्तुशब्दात् इ-ई-इ इत्यादिषु च । तन्मते अस्य घुसंज्ञापि । यथा । स्वघौ घुरू । स्वघंसंज्ञौ घौरुसंज्ञः स्यात् । इति वोपदेवः ॥ मेषवृषकुम्भमीनराशयः । यथा । अस्वास्तिमिगोऽविघटाः । इति ज्योतिस्तत्त्वम् ॥

ह्रस्वः, त्रि, (ह्रस+वन्) क्षुद्रवस्तुमात्रम् । तत्पर्य्यायः । वामनः २ न्यङ् ३ नीचः ४ खर्व्वः ५ । इत्यमरः । ३ । १ । ७० । नीचैः ६ । इति शब्दरत्नावली ॥ अनुच्चः ७ । इति जटाधरः ॥ तद्वैदिकपर्य्यायः । ऋहन् १ ह्रस्वः २ निघृष्वः ३ मायुकः ४ प्रतिष्ठा ५ कृधु ६ वम्रकः ७ दभ्रम् ८ अर्भकः ९ क्षुल्लकः १० अल्पः ११ । इत्येकादश ह्रस्वनामानि । इति वेदनिघण्टौ ३ अध्यायः ॥

ह्रस्वकुशः पुं, (ह्रस्वश्चासौ कुशश्चेति । नित्यकर्म्मधारयः ।) श्वेतकुशः । इति राजनिर्घण्टः ॥

ह्रस्वगर्भः, पुं, (ह्रस्वो गर्भोऽस्य ।) कुशः । इति रत्नमाला ॥

ह्रस्वगवेधुका, स्त्री, (ह्रस्वा गवेधुका । नित्यकर्म्मधारयः ।) गाङ्गेरुकी । इत्यमरः ।२।४।११७॥ अस्याः पर्य्यायगुणा नागबलाशब्दे द्रष्टव्याः ॥

ह्रस्वजम्बुः, पुं, (ह्रस्वो जम्बुः ।) क्षुद्रजम्बुः । इति रत्नमाला ॥

ह्रस्वतण्डुलः, पुं, (ह्रस्वः तण्डुलः ।) राजान्नम् । इति राजनिर्घण्टः ॥

ह्रस्वदर्भः, पुं, (ह्रस्वो दर्भः ।) श्वेतकुशः । इति राजनिर्घण्टे ह्रस्वकुशशब्ददर्शनात् ॥

ह्रस्वदा, स्त्री, (ह्रस्वैरपि दीयते छिद्यते इति । दो+कः ।) शल्लकी । इति राजनिर्घण्टः ॥

ह्रस्वपत्रकः, पुं, (ह्रस्वानि पत्राणि यस्य । कप् ।) गिरिजमधूकवृक्षः । इति जटाधरः ॥

ह्रस्वपत्रिका, स्त्री, (ह्रस्वानि पत्राण्यस्याः । कप् । टाप् अत इत्वम् ।) अश्वत्थी । इति राजनिर्घण्टः ॥

ह्रस्वप्लक्षः, पुं, (ह्रस्वश्चासौ प्लक्षश्चेति ।) क्षुद्रप्लक्षवृक्षः । तत्पर्य्यायः । सुशीतः २ शीतवीर्य्यकः ३ पुण्ड्रः ४ महावरोहः ५ ह्रस्वपर्णः ६ पीपरिः ७ भिदुरः ८ मङ्गलच्छायः ९ । अस्य गुणाः ।
"प्लक्षः कटुः कषायश्च शिशिरो रक्तदोषजित् ।
मूर्च्छाभ्रमप्रलापघ्नो ह्रस्वप्लक्षो विशेषतः ॥"
इति राजनिर्घण्टः ॥

ह्रस्वफला, स्त्री, (ह्रस्वं फलं यस्याः ।) भूमिजम्बु । इति राजनिर्घण्टः ॥

ह्रस्वमूलः, पुं, (ह्रस्वं मूलं यस्य ।) रक्तेक्षुः । इति राजनिर्घण्टः ॥

ह्रस्वशाखाशिफः, पुं, (शाखा च शिफा शाखाशिफौ । ह्रस्वे शाखाशिफे यस्य ।) क्षुपः । इत्यमरः ॥

ह्रस्वा, स्त्री, मुद्गपर्णी । नागबला । भूमिजम्बुः । इति राजनिर्घण्टः ॥ वामनी च ॥

ह्रस्वाग्निः, पुं, (ह्रस्वोऽग्निरस्मात् ।) अर्कवृक्षः । इति शब्दचन्द्रिका ॥

ह्रस्वाङ्गः, पुं, (ह्रस्वमङ्गमस्य ।) जीवकौषधम् । इत्यमरः । २ । ४ । १४२ ॥ वामनश्च ॥

ह्राद, ङ स्वने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) रेफयुक्तो द्वितीयस्वरी । ङ, ह्रादते । इति दुर्गादासः ॥

ह्रादः, पुं, (ह्राद+घञ् ।) शब्दः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ७ । ८० । २९ ।
"ह्रादेन गजघण्टानां शङ्खानां निनदेन च ॥")
हिरण्यकशिपुपुत्त्रः । यथा,—
"हिरण्यकशिपोः पुत्त्राश्चत्वारः सुमहाबलाः ।
प्रह्लादः पूर्व्वजस्तेषामनुह्रादस्तथैव च ॥
संह्रादश्चैव ह्रादश्च ह्रादपुत्त्रान् शृणुष्व तान् ।
ह्रादस्य पुत्त्रौ द्वावास्तां हिण्डिभो मूक एव च ॥"
इति वह्निपुराणे कश्यपीयप्रजासर्गः ॥

ह्रादिनी, स्त्री, (ह्रादते शब्दायते इति । ह्राद+णिनिः । ङीप् ।) विद्युत् । (यथा, महाभारते । ९ । ११ । २६ ।
"ह्रादिन्य इव मेघेभ्यः शल्यस्य न्यपतन् शराः ॥")
वज्रम् । इत्यमरः ।१।३।९ ; १।१।५१ ॥ नदी । इति भरतः राजनिर्घण्टश्च ॥ शल्लकी । इति शब्दरत्नावली ॥

ह्रादी, [न्] त्रि, (ह्रादोऽस्यास्तीति । ह्राद+इनि ।) शब्दविशिष्टः । (यथा, महाभारते ।८।५१।५१ ।
"रथाः पञ्चशताश्चान्ये ह्रादिनश्च सुवर्म्मिणः ॥")

ह्रासः, पुं, (ह्रस रवे+घञ् ।) शब्दः । इति त्रिकाण्डशेषः ॥ क्षयः । यथा, तिथ्यादितत्त्वे ।
"ह्रासवृद्धी च सततं दिनरात्र्योर्यथाक्रमम् ।
सन्ध्या मुहूर्त्तमाख्याता ह्रासे वृद्धौ समा स्मृता ॥"

ह्रिणीया, स्त्री, लज्जा । इत्यमरटीकायां भरतः ॥ अस्य रूपान्तरम् । ह्रणीया हृणीया च ॥

ह्रितः, त्रि, (ह्रीतः । पृषोदरादित्वात् साधुः ।) लज्जितः । विभक्तः । नीतः । इति केचित् ॥ अंशे, क्ली ॥

ह्रितिः, स्त्री, (हृतिः । पृषोदरादित्वात् साधुः ।) हृतिः । हरणम् । इति केचित् ॥

ह्रिवेरं, क्ली, (ह्रियै लज्जायै वेरमङ्गमस्य । पृषोदरादित्वात् ह्रस्वः ।) ह्रीवेरम् । इति भरतद्विरूपकोषः शब्दरत्नावली च ॥

ह्री, लि लज्जे । इति कविकल्पद्रुमः ॥ (ह्वा०-पर०-अक०-अनिट् ।) लि, जिह्रेति । नीचसङ्गत्या यः । इति दुर्गादासः ॥

ह्रीः, स्त्री, (ह्री लज्जायां+सम्पदादित्वात् क्विप्) लज्जा । इत्यमरः । १ । ७ । २३ ॥ (यथा, मार्कण्डेयपुराणे । १२९ । २२ ।
"नाहं तात ! करिष्यामि पृथिव्याः परिपालनम् ।
नापैति ह्रीर्मे मनसो राज्येऽन्यं त्वं नियोजय ॥")